योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०७५

पञ्चसप्ततितमः सर्गः ७५

श्रीवसिष्ठ उवाच ।
अथ वर्षसहस्रेण तां पितामह आययौ ।
वरं पुत्रि गृहाणेति व्याजहार नभस्तलात् ।। १
सूची कर्मेन्द्रियाभावाज्जीवमात्रकलावती ।
न किंचिद्व्याजहारास्मै चिन्तयामास केवलम् ।। २
पूर्णास्मि गतसंदेहा किं वरेण करोम्यहम् ।
शाम्यामि परिनिर्वामि सुखमासे च केवलम् ।। ३
ज्ञातं ज्ञातव्यमखिलं शान्ता संदेहजालिका ।
स्वविवेको विकसितः किमन्येन प्रयोजनम् ।। ४
यथा स्थितेयमस्मीह संतिष्ठेयं तथैव हि ।
सत्यासत्यकलामेव त्यक्त्वा किमितरेण मे ।। ५
एतावन्तमहं कालमविवेकेन योजिता ।
स्वसंकल्पसमुत्थेन वेतालेनेव बालिका ।। ६
इदानीमुपशान्तोऽसौ स्वविचारणया स्वयम् ।
ईप्सितानीप्सितैरर्थः को भवेत्कलितैर्मम ।। ७
इति निश्चययुक्तां तां सूचीं कर्मेन्द्रियोज्झिताम् ।
तूष्णींस्थिता सनियतिः स पश्यन्भगवान्स्थितः ।। ८
ब्रह्मा पुनरुवाचेदं वीतरागां प्रसन्नधीः ।
वरं पुत्रि गृहाण त्वं किंचित्कालं च भूतले ।। ९
भोगान्भुक्त्वा ततः पश्चाद्गमिष्यसि परं पदम् ।
अव्यावृत्तिस्वरूपाया नियतेरेष निश्चयः ।। 3.75.१०
तपसानेन संकल्पः सफलोऽस्तु तवोत्तमे ।
पीना भव पुनः शैले हिमकाननराक्षसी ।। ११

यया पूर्वं वियुक्तासि तन्वा जलदरूपया ।
बीजान्तवृक्षता पुत्रि बृहद्वृक्षतया यथा ।। १२
योगमेष्यसि भूयश्च तन्वान्तर्बीजरूपिणी ।
तयैव रससेकेन लतयेवाङ्कुरस्थितिः ।। १३
बाधां विदितवेद्यत्वान्न च लोके करिष्यसि ।
अन्तःशुद्धा स्पन्दवती शारदीवाभ्रमण्डली ।। १४
अश्रान्तध्याननिरता कदाचिल्लीलया यदि ।
भविष्यसि बहीरूपा सर्वात्मध्यानरूपिणी ।। ७
व्यवहारात्मकध्यानधारणाधाररूपिणी ।
वातस्वभाववद्देहपरिस्पन्दाद्विलासिनी ।। १६
तदा विरोधिनी पुत्रि स्वकर्मस्पन्दरोधिनी ।
न्यायेन क्षुन्निवृत्त्यर्थं भूतबाधां करिष्यसि ।। १७
भविष्यसि न्यायवृत्तिर्लोके त्वन्यायबाधिका ।
जीवन्मुक्ततया देहे स्वविवेकैकपालिका ।। १८
इत्युक्त्वा गगनतलाज्जगाम देवः सूची सा भवतु ममेति किं विरोधः ।
रागो वाब्जजवचनार्थवारणेऽस्मिन्नित्यन्तः स्वतनुमयी मनाग्बभूव ।। १९.
प्रादेशः प्रथममभूत्ततोऽपि हस्तो व्यामश्चाप्यथ विटपस्ततोऽभ्रमाला ।
सोद्यत्स्वावयवलता बभौ निमेषात्संकल्पद्रुमकणिकाङ्कुरक्रमेण ।। 3.75.२०
तद्गात्राण्यविकलशक्तिमन्ति देहादुद्भूतान्यथ करणेन्द्रियाणि सम्यक् ।
संकल्पद्रुमवनपुष्पवत्समन्ताद्बीजौघान्यलमभवंस्तिरोहितानि ।। २१
इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे सूच्युपाख्याने सूचीशरीरलाभो नाम पञ्चसप्ततितमः सर्गः ।। ७५ ।।